तथात्वम् विभागे "विव्यास वेदान् यस्मात् स तस्मात् व्यास इति स्मृतः" भा०आ०प०। पारावारेति व्यस्तं समस्तं विपरीतञ्च" सि०कौ०। व्यस्तः "व्यस्तरात्रिन्दिवस्य ते" कुमा०। पृथक्करणे एवैकशः प्रयोगे व्यस्तः "व्यस्तसमस्तमहाव्याहृतिहोमे" भवदेव। निवारणे च "व्यस्यन्दृन्यां शिशिरैः पयोभिः" भट्टिः। विक्षेपे "व्यस्तास्तारागणादिव" भा०।

वि—नि—अर्पणे। "विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यस्ता" सि०मु०। "विभागविन्यस्तमहार्घरत्नम्" भट्टिः।

सम्—संक्षेपे "समासेन निबोधत" पुरा०समस्या। संक्षिप्यन्यसने यथा पीतम् अम्बरमिति समुदायस्य पीताम्बर इति संक्षेपेण प्रयोगः समासः। "सर्व्वोऽप्येकदेशोऽह्ना सह समस्यते" वार्त्ति०। "समस्यमानपदार्थातिरिक्तपदार्थबोधकत्वं बहुव्रीहित्वमिति सारमञ्जरी। "समासः षड्विधो बुधैः" हरिः साकल्ये च समस्तम् "ज्ञानमस्ति समस्तस्य देवीमा०। "व्यस्तसमस्त महाव्याहृति होमे विनि०" भवदे०। संयोजने च समस्य सम्पादयत गुणैरिमाम्" किरा०।

**असंयत** त्रि० न०त०। बन्धनशून्ये "असंयतोऽपि मोक्षार्थी" काद०। असंयतः अबद्धः अकारे विष्णौ भक्तस्य।

**असंयुक्त** त्रि० विरोधे न०त०। १वियुक्ते। २व्यञ्जनवर्णामिश्रिते व्यञ्जनवर्णे ३द्रव्यान्तरैरसंसृष्टे च।

**असंयुत** त्रि० न०त०। संयुतभिन्ने "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्" पा० शिक्षा।

**असंयोग** पु० अभावे न०त०। १संयोगाभावे न०ब०। २संयोगशून्ये त्रि०।संयोगः क्रियाजन्यः द्रव्याश्रयगुणविशेषः हल्वर्णयोरचाऽव्यवधानञ्च। "असंयोगोपधात्" पा०।

**असंलग्न** त्रि० न०त०।१संलग्नभिन्ने विभक्ते २असंबद्धे च।

**असंवृत** त्रि० न संवृतः। १अनावृते "नासंवृतमुखः कुर्यात् क्षुतं जिह्माां तथैव च" स्मृतिः"संवृतं संवरणम् न०७त०। अत्यन्तावरके २नरकभेदे न० "योह्यस्य धर्म्ममाचष्टे यश्चोपदिशति व्रतम्। सोऽसंवृतं नाम तमः सह तेनैव गच्छति" मनुः।

**असंशय** पु० अभावे न०त०। १सन्देहाभावे न०ब०। २सन्देहशून्ये "असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः" शकु०सन्देहश्च एकस्मिन् धर्म्मिणि विरुद्धकोटिद्वयज्ञानम् यथा पर्व्वतो वह्निमान्नवा दहनतदभावरूपविरुद्धकोटिद्वयमेकस्मिन् पर्व्वते धर्म्मिणि ज्ञायते"स्थाणुः पुरुषो वेत्यत्र अस्थाणुत्वस्य पुरुषत्वव्याप्यतावच्छेदकतयाऽगृहीतधर्म्मकत्वेन विरुद्धत्वात्तथात्वमिति वेदः। २निश्चये च

**असंश्रव** त्रि० नास्ति संश्रवः सम्यक् श्रवणं यत्र। सम्यक्श्रवणायोग्ये दूरदेशादौ। "असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्" मनुः।

**असंश्लिष्ट** त्रि० न०त०। संश्लेषशून्ये १विभक्ते २असङ्गते च।

**असंसर्ग** पु० अभावे न०त०। १संसर्गाभावे। न०त०। २संसर्गशून्ये निस्सम्बन्धे।

**असंसर्गाग्रह** पु० असंसर्गस्य परस्परसम्बन्धाभावस्याग्रहः। मीमांसकोक्तस्य इदमिति रजतमित्यादि ज्ञानद्वयस्यापि प्रवृत्तिजनकताप्रयोजके परस्परसम्बन्धाभावस्याबोधे। विस्तरः असत्ख्यातिशब्दे अख्यातिपक्षनिरूपणे ५२२पृष्ठे दृश्यः।

**असंसृष्ट** त्रि० न० त०। १संसर्गरहिते। संसर्गश्च द्रव्ययोः सम्बन्धः धनिनोरेकत्र द्रव्ये विभागानन्तरं समुदायस्वामित्वसम्पादनञ्च "विभक्तोयः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या स तु संसृष्ट उच्यते" बृह० उक्तेः। संसृष्टं द्रव्यमस्यास्ति अर्श०अच् संसृष्टः। इनि संसृष्टी च विभानन्तरमेकत्र द्रव्येऽन्येन सह सम्बन्धवान् तद्भिन्नः असंसृष्टः असंसृष्टी च "अन्योदर्य्यस्तु संसृष्टी-नान्योदर्य्यधनं हरेत् असंसृष्ट्यपि चादद्यात् संसृष्टोनान्यमातृजः" या०स्मृ०। "तस्माद्विभक्तासंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं गृह्णातीति" मिता०।

**असंस्कृत** त्रि० सम्+कृ-क्त सुट् न०त०। १गुणान्तराधानमनीते २अपरिष्कृते ३गर्भाधानादिसंस्काररहिते, च। असंस्कृतः सुतो ज्येष्ठोनापरो वेदपारगः" स्मृतिः "असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्व्वसंस्कृतैः" या०स्मृ०। व्याकरणसंस्कारशून्ये ४अपशब्दे पु० "संस्कारोहि सतो गुणान्तराधानम् सच लौकिकालौकिकहेतुकः। तत्र यथा गर्भाधानादिना अलौकिकेन हेतुना देहः संस्क्रियते तत्संस्काराच्च तदभिमानी देही। एवं स्नानाचमनादिनाऽपि। लौकिकेन तु पाकादिना द्रव्यान्तरयोगेन वा अन्नादौ गुणान्तरमाधीयते अतएव संस्कृतं भक्ष्याः इति पा० सूत्रे भक्ष्यस्य दध्याद्युपसेकेन संस्कार उक्तः। शरावे संस्कृतः शरावः सक्तुः दध्ना संस्कृतः दाधिकः सूपः" सि०कौ०।

**असंस्तुत** त्रि० न०त०। १अपरिचिते। "प्रेयानप्यसंस्तुत इव परित्यक्तः" काद०। २सम्यगस्तुते च।

**असंस्थित** त्रि० न०त०। १अप्रेते परलोकं प्रति अप्रस्थिते "असंस्थितान् प्राणान् संस्थापयेत्" शत०ब्रा०२असुस्थिते